श्रीहरिः ।

दर्शनादर्शः ।

गोस्वामिसहस्रदीधितिश्री १०८ श्रीगोकुलनाथ-
महोदयानामाज्ञया
निर्माताऽस्य

शुद्धाद्वैतभूषणसाहित्याचार्य-
भट्टश्रीरमानाथः

निर्णयसागरे संमुद्रितः

स० १९१६.

वल्लभाब्दः ४३७

निर्मञ्छनं- =)

॥ श्रीहरिः ॥

दर्शनाऽऽदर्शः ।

मङ्गलम्

एषैव मातरतिमात्रकुचा भुजाभ्या-
मेवं निपीड्य पथि मां प्रपलायिताऽद्य ।
इत्थं करेण ललितां क्षिपतः प्रियाणि
मातुः पुरः शिशुहरेर्वचनान्यवन्तु ॥ १ ॥

कुलदेवतास्मरणम्

दीपमन्धतमसच्छिदे सुधासान्द्रसूक्तिरचनाऽमृतालयम् ।
इन्दिराकुलगृहं भजेऽनिशं दिव्यवाजिवदनांघ्रिपङ्कजम् ॥ २ ॥

आचार्याश्रयः

यत्प्रसादकणमन्तरा जनो नैकमक्षरमपीक्षितुं क्षमः ।
चम्पकाननचरं चिरं श्रये वल्लभं कमपि दिव्यभास्करम् ॥ ३ ॥

दर्शनानामेकवाक्यता मिथो विरोधो वा ? ।

एतदिह वक्तुं युक्तमुत्पश्यामः ।

सत्यपि तत्वैकत्वे तत्वानि भिद्यन्त एवेति न परोक्षं प्रेक्षावताम् । मूलं चाऽत्र वस्तुस्वभाव एव । घनमपि घृतं द्रुतमपि दृश्यत एव । तस्य तत्स्वभावत्वात् । एवमभेदेऽपि वास्तवे तत्वानां भेदोऽपि । तत्स्वभावस्य तादृशत्वात् । न हि स्वभावः परिहर्तुं शक्यः । न हि वह्निस्तर्कसहस्रेणापि साधितं जलं भवति । स्वभावस्तु केन भिद्यत

Published by Pandit Ramanath Sharma, Bada Mandir, Bhuleshwar, Bombay.

Printed by Ramchandra Yesu Shedge, at the 'Nirnaya-sagar' Press, 23, Kolbhat Lane, Bombay.

[All Rights Reserved by the Publisher.]

पुस्तकानां प्राप्तिस्थानम् ।

श्रीमद्बालकृष्णपुस्तकालयः. बडामंदिर. बाम्बे.

इति तु वक्ष्यते । दर्शनानामपि यत्किञ्चिद्दर्शकत्वेन भवत्वभेदः किन्तु वास्तवस्तु भेद एव पर्यवस्यति । तत्राऽस्तिनास्तीतिदर्शनात् । विरुद्धयोरपि यत्किंचित्त्वेनाऽभेदो हि तत्राऽप्रयोजकः । अन्यथा नीलत्व-पीतत्वकटुमधुरादीनामपि परस्परविरुद्धानां वक्तव्यं स्यादैक्यम् । गुणत्वसामान्यात् । एकवाक्यतामपि वास्तविकीं प्रमाणयामः । न तु हठात्साधिताम् । निष्फलत्वात् । साधितायामपि तस्यां वस्तु तथाविधमेव दृश्येत । विरोधोऽप्यत्र न केशाकेशिविग्रहः किन्तु विचारवैमत्यम् । तत्तु वाचनिकमेवेति न काचिद्धानिः । ये तु दर्शन-विरोधेनैव भारतीयानामवनतिर्जातेति प्रलपन्ति नादरणीयास्ते बुद्धि-मद्भिः । दृश्यते हि बहुलममेरिकादिवास्तव्येष्वपि विद्वत्सु विचार-भेदः । न तेन तैः कैश्चिदप्येवमुच्यतेऽमुकेन सहास्माकं विरोधो विग्रहो वेति । प्रत्युत विचारविभेदैः पदार्थपरिष्कार इति ते स्वदे-शोन्नतिमेव मन्यमानाः प्रमोदन्तेतमाम् । तथा च सिद्धो भारतीयानां परस्परविचारभेदः । उद्देश्यभेदः । फलभेदश्च । न च तथापि काचिद्धानिश्च ।

अयमाशयः—दर्शनं हि नामाऽपरोक्षं ज्ञानं साक्षात्कारो वा । शब्दस्य तत्रैव शक्तिरिति । परोक्षज्ञाने तु साक्षात्कारसादृश्याभासा-नुरोधादौपचारिक एव प्रयोगोऽयम् । परोक्षज्ञानकारणेष्वपि शास्त्रेषु कार्यकारणैक्यमनुसृत्यैव दर्शनपदव्यवहार इति औपचारिकत्वं स्पष्टम् । शब्दो हि परोक्षमेव ज्ञानं कारयति नाऽपरोक्षम् । मथुरां दिदृक्षुर्यदि तत्प्रतिकृतिं तत्स्वरूपप्रतिपादकं पुस्तकं वा गृहीत्वा 'एष विश्रान्तघट्टः, एषा यमुना, एतद्वारकाधीशमंदिरं, इत्यादि विचा-रयेन्न तेन मथुरासाक्षात्कारः स्यात् । बुभुक्षुर्यदि क्षीरलड्डुकादिभोज्य-

मीमांसां शतमप्यावर्तयेन्मन्ये न तेन तस्य तत्पदार्थसाक्षात्कारः स्यात् । तस्मात् ये **'दशमस्त्वमसी'**त्यादि दृष्टान्तीकृत्य **'तत्त्वमसी'** त्यादिवाक्यजातैस्तत्त्वसाक्षात्कारं साधयितुं चेष्टन्ते ते हि फाल्गुन-बालका इव परिहासपात्रमात्रम् । उक्तं च केनापि तत्तत्त्वविदा **'कलौ वेदान्तिनो भान्ति फाल्गुने बालका इवेति'** साक्षात्का-रस्तु पदार्थानां तदसाधारणसाधनैस्तदनुग्रहादिभिर्योगादिभिर्वेति मन्या-महे । तस्माद्विचारमात्रेण पदार्थानां तत्त्वसाक्षात्कारं ये केचन मन्यन्ते तेषामपि शास्त्रेषु दर्शनव्यवहार औपचारिक एव । विचार-साधनाभ्यां तत्वज्ञानं प्रतिपादयतां दर्शनानामपि द्वेधा भेदः । नास्तिवादीनि-अस्तिवादीनि चेति । नास्तिकत्वाऽस्तिकत्वे चतुर्मुखं विद्वांसोऽपि बहुलं विवदन्ते । नास्ति परलोक इति वादीत्येके । वेदमार्गमननुरुन्धान इत्यपरे । नास्ति जगत्कर्ता कश्चनेति केचित् । अलौकिकशब्दाप्रामाण्यवचन इति भिन्नाः । मिथ्यावादीति केचन । एवं नास्तिकत्वे बहव एव विकल्पाः प्रचरन्ति लोके विद्वत्सु च । तत्र किमिह प्रतिपत्तव्यमिति चेदुच्यते–**'मिथ्यादृष्टिर्नास्तिकते'**-त्येव कोशकृदुक्तिर्युक्तेति मन्यामहे । अर्थात्–यः खलु लोकाऽनधि-गतार्थगन्तृशब्दे वेदराशौ मिथ्यादृष्टिः-कथमप्यप्रामाण्यशङ्की-तद्वादी वेति स एव नास्तिकः । अत्रैव सर्वविकल्पानामन्तर्ग्राहात् । उक्तं च श्रीमनुना—

योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद्द्विजः ।
स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दक इति ॥

अत्र हेतुशास्त्राश्रयादित्यस्य 'लोके इदं दृष्टं तस्मादिदं साधु, इदं न दृश्यत इत्यसाधु' इति–हेतुभिर्यददृष्टार्थाभिशङ्कि शास्त्रं तदा-

श्रयादित्यर्थो ज्ञेयः । यत्त्वस्य कोषस्य टीकाकृताऽर्थः कृतः स तु नास्तिकतार्थैकदेशो विवादग्रस्तश्चेति नादरणीयः । मनूक्तिविरोधाच्च । तस्मात् कथमपि वेदाऽप्रामाण्यवादी नास्तिक इत्येव साधु । तत्कृतं शास्त्रं दर्शनं वा नास्तिकदर्शनम् ।

तत्र लौकायतिकाः—नास्ति परलोकः । ततस्तत्साधनेषु मुधा न परिश्रान्तव्यम् । तत्प्रमाणं च प्रत्यक्षमेव न शाब्दादि । पंचभूतपरमाणूनां यथार्थतः संग्रहो देह एवाऽऽत्मा । न कश्चिन्नित्यश्चेतनः । स चाऽऽत्रैव भस्मीभवति नान्यत्र गच्छन्दृश्यत इति प्रत्यक्षम् । अतोऽपि नास्ति परलोक इत्याहुः ।

तथा च तदुक्तिसंक्षेपः—

न स्वर्गो नाऽपवर्गो वा नैवात्मा पारलौकिकः ।
नैव वर्णाश्रमादीनां क्रियाश्च फलदायिकाः ॥
त्रयो वेदस्य कर्तारो धूर्तभण्डनिशाचराः ।
जर्फरीतुर्फरीत्यादि पंडितानां वचः कथम् ॥ इत्यादिः ।

एतेन **'सर्वलोकेषु कामचारो भवति' 'विज्ञानं यज्ञं तनुते' 'स्वर्गकामो यजेत' 'निःश्वसितमस्य वै वेदाः'** इत्याद्यलौकिकशब्दोक्तार्थमप्रमाणीकुर्वतां लोकायतिकानां दर्शनं तत्वसाक्षात्काराभावादसदुक्तनास्तिकलक्षणे समन्वयाच्च **दर्शनाभासं नास्तिकं** च ।

वेदमार्गमननुरुन्धानाश्च बौद्धाः । तत्र तेषां मुख्याश्चत्वारो भेदाः । सौत्रान्तिकवैभाषिकयोगाचारमाध्यमिकाः । सौत्रान्तिकवैभाषिकौ तावद्बाह्यमर्थजातमस्तीति मन्येते । किन्तु क्षणिकम् । तयोर्मते बुद्धिरेव नीलपीताद्याकाराऽऽत्मा । बुद्धेर्नीलपीताद्याकारेभ्य

एव बाह्यमर्थजातमस्तीत्यनुमीयते । स्वप्नवत्क्षणभंगुरमिति मिथ्या च । बहिः प्रतीयत इति बाह्यम् । आन्तरस्त्वर्थः केवलं क्षणिकं विज्ञानमेव । तच्च मोक्षेऽपि नाऽपैति । प्रत्युत मोक्षे विज्ञानं तत्तदाकारानुभवनं तांश्च विमुच्य विशुद्धं भवति। विज्ञानस्य सवासनं बाह्याकारपरित्यागः शून्यतयाऽवस्थानमेव मोक्षः ।

विज्ञानस्य क्षणिकत्वेऽपि तस्य समानसन्तानानां धारावाहिकत्वेन वह्नीष्वपि ज्वालासु **'सोऽयं दीप'**—इतिवन्नित्यत्वभ्रम एकत्वावधारणं च न विरुद्धम् । ननु विज्ञानस्य क्षणिकत्वे कर्मफलभोगः स्मृतिनियमश्च कथं निर्व्यूढः स्यात् । भोक्तुरनुभवकर्तुश्च विज्ञानस्य नष्टत्वात् । उच्यते । पूर्वपूर्वविज्ञानमुत्तरस्मिंस्तस्मिन्वासनां परित्यज्य नश्यतीति सर्वं सुस्थम् । ननु वासना हि नाम संस्कारविशेषः । स चाऽनुभवमन्तरा नोत्पद्यते । अनुभवश्च पदार्थपूर्वभावित्वमपेक्षते । सर्वतः पूर्वस्य तु पदार्थस्याऽभावात्कथमनुभवस्तत्संस्कारश्चेति चेन्नैष दोषः । क्षणिकस्याऽपि स्वप्ने पदार्थस्याऽनुभवात् । वासनाप्रतिपन्नस्याऽपि संभवदनुभवकत्वात् । तेन च वासनासंभवात् । बीजाङ्कुरवद्वासनानां तद्विधपदार्थस्यापि चाऽनादित्वान्न पूर्वाऽपरभावशङ्काऽपि । इत्येवमाहतुः ।

योगाचाराश्च । स्वयं विज्ञानमस्तीत्येव साधु । अन्यथा प्रपञ्चाप्रपत्तिः स्वीकृता स्यात् । तच्च शुद्धाऽहमहमिति धारावाहिनी बुद्धिरेवेति पर्यवस्यति । सा च स्वयमात्मप्रकाशिनी प्रदीपवदित्युक्तम् । बाह्यार्थस्तु प्रातीतिकोऽनुमानगम्य एव न सन् । यश्च ग्राह्यग्राहकयोर्भेदः सोऽपि द्विचन्द्रावभास इव प्रातीतिक एव । तद्दर्शने चानाद्यविच्छिन्नवासनासन्तानमेव हेतुः । वासनासन्तानं च 'तदिदं सर्वं

दुःख'मिति चिरभावनयाऽपैति सैव मुक्तिरित्याहुः । यद्यप्येते त्रयोऽपि पर्यवसाने शून्यवादिन एव तथापि स्पष्टं न ब्रुवते । माध्यमिकास्तु स्पष्टमेवाभिदधति 'सर्वं शून्य'मिति । एकस्यैव सुगतस्योपदेशोऽप्युपदेश्यान्तःकरणवैचित्र्याच्चतुर्धा प्रक्रियान्तरेण विभिद्याऽन्ते शून्ये पर्यवसन्नः ।

माध्यमिकास्तावत् । यत्स्तम्भादिकमर्थजातमनुमेयमिति सदित्युच्यते परैस्तत्किं परमाणवस्तत्समूहो वा? । परमाणव इति तु न वक्तुं शक्यते । तथा सति 'स्थूलोऽयं स्तम्भ इति ज्ञानं न स्यात् । परमाणूनामतिसूक्ष्मत्वादनेकत्वाच्च । समूहस्तु परमाणूनन्तरा गवेषितोऽपि न मिलति तदसदेव बाह्यार्थजातम् । विज्ञानेऽपि समानैव युक्तिः । विज्ञानं सदसद्वा? । सच्चेत्कुतः सुषुप्तौ न स्फुरति । ननु तदा तदभावो नास्ति । जागरितः सुखस्वापं स्मरतीति । नेदमपि चारु । विषयविज्ञानयोः सहोपलम्भनियमात्सुषुप्तौ विषयाभावाज्ज्ञानाभावः । यत्तु सुखस्मरणमिति प्रलप्यते तदपि तथा । सुखदुःखयोस्तदानीमभावादस्फुरणाच्चेत्यर्थो विज्ञानं चाऽसत् । नचाऽसदेवेति युक्तम् । असतोऽभानात् । न चोभयमेव मन्तव्यम् । सदसतोर्विरुद्धत्वादेकत्राऽनवस्थितेः । अनुभयरूपमित्यपि न । एकस्य निषेधोऽन्यस्य विधिं ज्ञापयति विधिश्च निषेधम् । तस्माच्छून्यं विज्ञानमपि । या प्रमात्रादिचतुष्टयी परकल्पिता साऽपि शशविषाणम् । विचारासहत्वात् । तथाहि–यस्तु प्रमाता न स प्रत्यक्षेण गृहीतुं शक्यते । **'अह'**मिति प्रत्ययस्तु गौरोऽहं कृशोऽहमित्यादि देहविषयकप्रत्ययैर्व्यभिचरति । अनुमानमपि प्रमातरि न प्रमाणम् । तदव्यभिचारिलिङ्गाभावात् । एतेन प्रमाणान्तरं व्याख्यातम् । तन्नास्त्येव प्रमाता । पूर्वोक्तकैर्-

र्बाह्याऽर्थाभावस्तु साधित एव । विषयस्य प्रमेयस्याऽभावेन प्रमाणमपि प्रमाणत्वहीनो नास्त्येव । तस्माद्विचारासहत्वादनिर्वचनीयत्वात्सर्वं शून्यमिति कथयन्ति । चत्वारोऽप्येते प्रतीत्यसमुत्पादोपसर्पणप्रत्ययाभ्यां **'कार्यं स्वयं भवतीति'**कर्ता कश्चन नास्तीत्यपि वदन्ति । विज्ञानस्य निर्वाणञ्च मोक्षम् ।

तदेष बौद्धमतसंक्षेपः—

यस्मिन्नेव हि सन्तान आहिता कर्मवासना ।
फलं तत्रैव सन्धत्ते कार्पासे रक्तता यथा ॥
सहोपलम्भनियमादभेदो नीलतद्धियोः ।
भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्दाविवाद्वये ॥
इदं वस्तुबलायातं यद्वदन्ति विपश्चितः ।
यथा यथाऽर्थाश्चिन्त्यन्ते विशीर्यन्ते तथा तथा ।
यथा यथा विचार्यन्ते विशीर्यन्ते तथा तथा ।
यदेतत्स्वयमर्थेभ्यो रोचते तत्र के वयम् ॥

इति

'सदेव सौम्येद–' 'यतो वा इमानि–' 'ब्रह्मविदाप्नोति परम्' 'सत्यं विज्ञानमानन्दं ब्रह्मे'त्यादिश्रुतिसहस्रनिष्पन्नानर्थानमन्यमानानां सौगतानामपीदं दर्शनं मिथ्यादृष्टित्वात् **'असन्नेव स भवति असद् ब्रह्मेति वेद चेत्'** इति निन्दाश्रवणाच्च दर्शनाभासं नास्तिकञ्च । एतेनार्हतमपि दर्शनं व्याख्यातम् ।

तर्कमेवाऽऽगमादपि प्रमाणं किं च वेदोऽपि न नित्य इत्यभ्युपगच्छन्तो रूपान्तरेण वेदाप्रामाण्यवचना वैशेषिशिका आक्षपादाश्च ।

तत्वानां पृथक् पृथक् स्वरूपाधिगमान्मोक्षं पृथिव्यादिनित्यद्रव्याणां स्वस्वरूपेण सत्तां अलौकिशब्दराशेर्वेदस्यानित्यताञ्चाहुरिति तेऽपि नास्तिका एव । **'एकमेवाऽद्वितीयं०' 'तस्माद्वा एतस्मात्०' 'वाचा विरूपनित्यया'** इत्याद्युक्तमप्रमाणीकुर्वन्तीति । साक्षात्कारमपि न मन्यन्ते । मन्यन्ते चेत्पदार्थानां तथापि **'एकविज्ञानेन सर्वं विज्ञातं स्या'**दिति श्रुत्युक्तैकब्रह्मविज्ञानेन पदार्थान्तरविज्ञानमित्याद्युक्तदिशा नेच्छन्तीति दर्शनाभासोऽप्येतद्दर्शनम् । यद्यप्येतैः कर्तृत्वेनेश्वरोऽनुमानेन साध्यते तथापि सिध्यन्नप्यसौ जीवविशेष एव सिध्यति नतु **'अपाणिपादो जवनो–' 'सर्वतःपाणि–'** इत्यादिश्रुतिप्रतिपादितप्राकृतविलक्षणसकलधर्मवानानन्दस्वरूप ईश्वरस्ततोऽपि तथा । यत्त्वेतेषामास्तिकत्वेन प्रवादः स तु स्थूलदृष्ट्या वेदोक्तपरलोकेश्वरादिपदार्थाभिमानविश्वासेन वेति सर्वमनवद्यम् । यच्चैतेषां वेदस्य पौरुषेयत्वस्थापनं तत्तु निपुणमनुमानागमैः प्रक्षिप्यापौरुषेयत्वमेवाऽस्थापि चित्सुखादिभिरिति विस्तरस्तत्रैव द्रष्टव्यः । सन्तु वा वेदविरुद्धांशपरित्यागेनैतेऽपि आस्तिकाः ।

'नास्ति कश्चिज्जगत्कर्तेति' निर्वचनं ब्रुवाणा मीमांसकाः । एते हि 'जगत्कर्तरि स्वीकृते स्वीकृतं भवति वेदानां पौरुषेयत्व' मिति भिया कंचनेश्वरं नाङ्गीकुर्वन्ति । एतन्मतसंक्षेपस्तु–कर्मैवेश्वरः । नान्यश्चेतनरूपः । स्वर्गः परमपुरुषार्थः । मन्त्रमयी तत्सूचिताग्नीन्द्रादिदेवता यज्ञशेषा । अर्थवादश्च स्वार्थे न प्रमाणम् । वेदः स्वतःप्रमाणमपौरुषेयश्च । प्रवाहन्यायेनाऽनादितो जगत्स्वयमेवं प्रचलतीत्यसौ ।

अत्रापि ब्रह्मकर्तृत्वफलदातृत्वादिप्रतिपादकानां देवतोपासनावमानानां च विरोधात्सर्वाऽऽस्तिकतन्त्रप्रसिद्धस्येश्वरस्य चाऽमतत्वान्नास्तिक-

त्वमेव । किं च जैमिनिः **'सर्वस्यापि वेदस्य क्रियाऽर्थत्वं' 'अतदर्थानां चाऽनर्थक्यं'** प्रतिजानीते । एवं चेत्सर्वस्यापि परकाण्डस्योपनिषद्भागस्य सिद्धपदार्थाभिधायित्वादवेदत्वलक्षणमप्रामाण्यं स्फुटमायातीति जैमिनिरपि तथा । किं च अर्थवादानां प्रमादपठितत्वं **'तुल्यं च सांप्रदायिक'** मित्यादिना निराकृत्य तत्र वेदत्वं स्थिरीकृत्यापि तान्स्वार्थेऽप्रमाणं वदतीति अलौकिकशब्दैकदेशाऽप्रामाण्यकथनलक्षणं नास्तिकत्वमप्येतस्य । अत्र मीमांसकेषु द्वेधा मतभेदः । प्रांचस्तावत् **'औषधं पिब शिखा ते वर्द्धिष्यते'** इत्यादिलौकिकवाक्येष्विव **'गावो वा सत्रमासत'** इत्याद्यर्थवाक्येष्वपि **'असद्वाऽवलम्बेन'** केवलविधेयस्तुतिपरत्वम् । न तु स्वार्थप्रामाण्यमपि । तथाच **'तत्सामान्यादितरेषु तथात्वम्'** इति न्यायेनाऽन्येषां **'वायुर्वै क्षेपिष्ठे'**त्याद्यर्थवादानामपि न स्वार्थप्रामाण्यमपि । किन्तु जहत्स्वार्थलक्षणया केवलविधेयस्तावकत्वमात्रम् । एवमुपनिषदां सिद्धपदार्थप्रतिपादिनीनामपीति संगिरन्ते । नवीनास्तु वार्तिककृत्प्रभृतयः सर्वेष्वप्यर्थवादवाक्येष्ववयवार्थाऽनतिक्रमेणैवाऽजहत्स्वार्थलक्षणया प्राशस्त्यपरत्वम् । **'आदित्यो यूप'** इत्यादावपि, ऊर्ध्वत्वादिगुणयोगादवयवार्थस्य सत्वात्स्वार्थप्रामाण्यमपि । **'प्रजापतिरात्मनो वपामुदखिदत्'** इत्यादौ सर्गादौ परमेश्वर एव स्वमहिम्ना पशुरूपमेकं कृत्वा तद्वपोत्कर्तनेन कर्म प्रायुङ्क्तेत्येवं प्रकारेण सर्वत्र सत्यत्वमुन्नेयम् ।

तथा च—

'विरोधे गुणवादः स्यादनुवादोऽवधारिते ।
भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मत' इत्याहुः ।

वस्तुतस्तु 'वेदेऽक्षरमात्रस्याप्यसत्यार्थप्रतिपादकस्याभावा' दित्युक्तिदिशा क्वचिदपि वेदेऽप्रामाण्यगंधोऽपि नास्ति । सर्वस्याऽपि स्वतःप्रामाण्यस्वीकारात् । अर्थादनधिगतार्थगन्तृत्वे सति स्वबुद्धिकार्श्येन कादाचित्काऽयोग्यताज्ञानाऽनपनोद्यप्रामाण्यस्वीकारात् । तथा च यद्वेदेष्वलौकिकार्थावेदकेष्वयोग्यताज्ञानं तज्ज्ञातृदोषादेव ननु वेदोक्तपदार्थेषु साऽस्ति । एकत्र तदभावेऽप्यन्यत्र तदुपलब्धेः । यथा सेतुबन्धादौ ग्राव्णां प्लवनम् । नचैवं प्रत्यक्षादिकमनुसृत्याऽन्यथा कल्पनीयमिति परमास्तिकानां सुदृढः सिद्धान्तः ।

किंच 'विद्यया वा करोति' इति श्रुत्या ज्ञात्वैव कर्म कर्तव्यमिति सिद्धेऽर्थवादाः कर्माङ्गभूतं पदार्थज्ञानमुपदिशन्तीति न किंचिदनुपपन्नम् ।

ननु 'अग्निर्हिमस्य भेषज' मित्यादीनां कथमलौकिकार्थाऽऽवेदकत्वमवगन्तव्यम् । नैष दोषः । 'अमरेष्वमरत्ववदनादित्वेऽपि जगतः प्राथमिके सृष्टिप्रारम्भे 'वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्मम' इत्याद्युक्तेः प्रजापतिर्भगवान् अलौकिकत्वेनात्मत्वेन स्थितस्य सकलस्यापि जगतस्तदाप्रभृति वेदवाचा लौकिकत्वं क्रीडायै नियमितवान् । ततश्च अर्वाचीनानामस्माकं दृष्ट्या वेदस्य क्वचित् लौकिकार्थावेदकत्वेऽपि न तथा । किन्तु तद्दृष्ट्याऽलौकिकार्थावेदकत्वमेवेत्यलं पल्लवेन । तदेवं जैमिनीयं दर्शनमर्धजरतीयम् । केषांचिदुक्त्या नास्तिकत्वमस्मदुक्त्या त्वास्तिकत्वमिति । तथापि 'तमेव विदित्वाऽतिमृत्युमेति' इत्यादिदेशितसाक्षात्कारदिशा साक्षात्काराभावाद्दर्शनाभासत्वं तु न मुञ्चति ।

आत्मभेदं प्रकृतिपरिणामं च सांख्या मन्यन्ते । द्वेधा हि सांख्यं,

निरीश्वरं सेश्वरं च । निरीश्वरास्तावदाहु **'स्त्रिगुणसाम्यावस्था प्रकृतिशब्दाभिधेयं जडं प्रधानं महदादिविशेषपर्यन्तेन प्रपञ्चरूपेण पुरुषोपभोगाय परिणमतीति** । सेश्वरवादेऽप्येवम् । इयांस्तु विशेषः—यथाहि संस्कृतक्षेत्रमधिष्ठाय तत्सम्पर्कवशाद्बीजमंकुरादिक्रमेण महान्तं वृक्षमारभत एवं क्लेशकर्मविपाकाशयैरपरामृष्टं पुरुषविशेषमाश्रित्य प्रकृतिर्जगदारभते । पुरुषा भोक्तारश्चेतनाः । प्रकृतिरेका कर्त्री भोग्या च ।

योगोऽप्युभयविधः, सालम्बनो निरालम्बनश्च । अन्यत्सर्वं प्रायः सांख्यसामान्यमत्र । विस्तरस्त्वेतदाकरे द्रष्टव्यः । एतयोरपि **'ब्रह्मकर्तृत्वतदैक्यवाक्यैर्विरोध'** इति तदेव नास्तिकत्वमापन्नं किन्तु प्रसिद्धिमनुसृत्य किंवा **'यथा यथोपासते तत्तदेव भवति'** इति विरोधं परिहृत्याऽऽस्तिकत्वम् । भेदद्वैधेनार्धजरतीयत्वमत्रापि ।

अवशिष्ट इदानीं **'मिथ्यावादी नास्तिक'** इति विकल्पः । तत्राद्वैतिनो मायावादिनो मिथ्यावादित्वमङ्गीकुर्वन्ति । अद्वैतसिद्ध्यादिषु तथादर्शनात् । मिथ्यात्वं च सदसद्भ्यामनिर्वचनीयत्वमिति भाषन्ते । एवंहि ते **'संविदमेकां केवलां विहाय सर्वमन्यन्मिथ्या । अनाद्यनन्ता संविच्च स्वभावेन धर्माकारक्रियाऽत्यन्ताभाववती । निर्धर्मकं ज्ञानमितियावत् । तदेव शुद्धं ब्रह्म । तच्चाधिष्ठानमस्य नामरूपस्यानिर्वचनीयस्याविद्या—(अज्ञान)कारणस्य मिथ्याभूतस्य कार्यजातस्य । तलिममायायुक्तं ज्ञानं शबलं ब्रह्म । घनमायायुक्तं तदेव जीवः । घनत्वंचाऽत्र तमोऽभिभूतत्वम् । स च कर्ता सुखदुःखभोक्ता च । अनाद्यनिर्वचनीयमज्ञानमेव मायाऽविद्येति शुद्धाशुद्धसत्वेन भेदकेन द्विधा भिन्नम् । भेदश्च सर्वे-**

षामेषामनादिरेव । अवस्थाद्वयं च–व्यवहारावस्था, वास्तविकी च । व्यवहारावस्थायां 'व्यवहारे वयं भाट्टाः' इति प्रतिज्ञया वेदः' तत्प्रामाण्यं, तदुक्तसाधनफलादि, सर्वं सदिव । वास्तवं तु **न वेदो न तत्प्रामाण्यं नेश्वरो न साधनफलानि न किमपीति सर्वं मिथ्येत्याहुः** । तथाचाऽत्राऽपि मते वेदेश्वरादि व्यवहार एव न वास्तवमित्यास्तिकत्वेन नास्तिकत्वेन चाऽर्धजरतीयत्वमेव । वस्तुतस्तु माध्यमिकाः शांकराश्चाद्वैतवादिनो न परस्परं विशेषभेदभिन्नाः । तथा हि **'सर्वशून्यमिति'** माध्यमिकाः । **'संविदेव निर्विशेषाऽविषया केवलं सतीति अद्वैतिनः ।'** तत्र तस्या अविषयत्वान्निर्विशेषत्वाच्च सर्वप्रमाणागोचरतया शून्यत्वमेव आयाति । नच निषेधमुखेन **'नेतिनेति'** इत्यादिश्रुतयो लक्षणया पारिशेष्यात्प्रतिपादयन्त्येव तद **'स्ति सेति'** वाच्यम् । अप्रयोजकत्वात् । नह्येवं प्रतिपादनं प्रयोजकं भवति । गृहे घटे सत्यपि **अस्मिन्यदस्ति तद्वयं कथमपि निर्देष्टुं न शक्नुम'** इत्युक्ते कथमस्मिन्कोष्टके घट इति ज्ञायताम् । नेतिनेति व्यावर्तितेऽपि पदार्थान्तरे घटज्ञानं दुःशकमेव । घट इत्यस्याऽपि विशेषत्वात् । तस्मान्निर्विशेषे परोक्षे संविद्रूपे ब्रह्मणि ज्ञातव्ये पारिशेष्यमप्यप्रयोजकमेव । **'ब्रह्म ज्ञानं संवित्'** इत्यस्याऽपि विशेषविशेषत्वाच्च । यत्र हि पदार्थः प्रत्यक्षविषयस्तत्र तु विशेषैर्वाचनिकैर्निर्देष्टुमशक्यत्वेऽपि व्यावर्तने पारिशेष्यात् **'अस्ती'** ति ज्ञानं संभवति । यत्र पुनरविषयत्वमेव वस्तुनस्तत्र पारिशेष्यमपि कुण्ठमेव । ननु **'जानामी'** त्यनुव्यवसायान्मानसिकप्रत्यक्षत्वाल्लोकसिद्धैव संवित् । तर्हि गतमविषयत्वमापैनिषदत्वञ्च । अवैदिकता च गले पतिता । किंच लक्षणा हि शक्यसंबंधे भवति निर्विशेषे तु तस्याऽसंभवान्न लक्षणासंभवोऽपि । न च काल्पनिकः संबंधोऽस्तीति न दोषः । तत्तेनैवाऽसत्वात् । मरुमरीचिकायां काल्पनिकेनैव संबंधेन बुद्धिमतामसत्यनिश्चयात् । नच मरुमरीचिकाज्ञानमनिर्वचनीयमेवास्ताम् नाऽसत् । लोके तथाऽप्रसिद्धेः । प्रत्युताऽसत्वेन निश्चयः । लोकानुसारिणी हि कल्पना भवति । तस्मादन्ततः शून्यमेवापतति । तथाच बाह्यवचनम् । **'विचारासहत्वमेव पदार्थानां तत्वम्'** । किंच **'विचारासहत्वमनिर्वचनीयत्व'**मिति द्वयमपि पर्यवसाने विचारस्य समानमेव । **'इदं न वक्तुं शक्यते इदमपि न वक्तुं शक्यते'** इत्यनिर्वचनीयत्वं नाम । विचारासहत्वमपि तदेवेति । पदार्थान्तरं च तत्सदृशमेवैतेषामिति तन्मतपदार्थैः परीक्ष्य जानन्तु विद्वांसः । विस्तरत्वान्नेह तन्यते । तस्मादब्रुवाणैर्बौद्धान्तरैरिव मायावादिभिरपि **'सर्वशून्य'** मिति पारिशेष्यात्सूच्यते ।

किं च **'प्रकृतैतावत्व०'** सूत्रे 'वाङ्मनसातीतमविषयान्तःपाति प्रत्यगात्मभूतं नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्मेति **श्रीशंकराचार्यवचनम्** । तत्रेदं जिज्ञास्यते ब्रह्मणो नित्यशुद्धादिस्वभावः केन प्रमाणेन ज्ञातः । वेदादिति चेद्वाङ्मनसातीतत्वमविषयत्वं चाऽपोहितम् । न केनाऽपि ज्ञातं चेच्छून्यत्वम् । न च पारिशेष्येण ज्ञातमिति वाच्यम् । विकल्पासहत्वात् । किमिदं पारिशेष्यं प्रमाणमप्रमाणं वा । प्रमाणं चेत्तद्विषयत्वादविषयत्वं नष्टमन्यथा प्रमाणाभावाच्छून्यत्वमेव । तत्रैव च **'न चाऽत्रेय'** मित्यादिना किंचिदाशङ्क्य परिहारे 'नेदं शास्त्रं प्रतिपाद्यत्वेन ब्रह्मणो रूपद्वयं निर्दिशति लोकप्रसिद्धं त्विदं रूपद्वयं ब्रह्मणि कल्पितं परामृशति' इति तद्वचनम् । तत्राऽपि

किमिदं रूपद्वयं स्वयं कल्पितं स्वयमेव वेदेनोच्यत उत लोककल्पितमनूद्यते । वेदकल्पितं चेद्वेदे वितथवादित्वारोपादप्रामाण्यवादित्वम् । लोककल्पितमिति चेद्वेदस्य सृष्टेरादिभवत्वान्नेदं वक्तुं शक्यं 'तत्सिद्धमनुवदति परामृशतीति वा' । तस्मान्मूर्तप्रतिपादनेऽमूर्तस्य तत्प्रतिपादने तस्य विरोधादुभयविरोधान्नैक' मितिन्यायाच्छून्यमेव । यत्र तु विरुद्धधर्माश्रयं ब्रह्म मन्यते तत्तु श्रुतत्वादित्यदोषः ।

किंच **'दर्शनाच्चे'** त्यत्रापि श्रुतत्वाददोष इति चेन्न एकस्याऽनेकस्वभावत्वानुपपत्तेरिति तद्वचनम् । तत्रापि वेदाप्रामाण्यवादित्वं स्थिरीभवति । तथा हि—श्रुत्युक्तं चेदुभयलक्षणकं ब्रह्म तर्हि श्रुतिप्रामाण्यवादिना तथैव मन्तव्यम् । तत्र केयं विभीषिका 'एकस्याऽनेकस्वभावत्वानुपपत्तिर्नाम' । एकस्याऽनेकस्वभावता हि लोके विरुद्धा । लोकश्च नालौकिकदर्शी भ्रान्तश्च भवति । वेदस्तु प्रमाणमूर्धन्य इति नैकमक्षरमप्यन्यथा ब्रूते । तल्लोकानुरोधेन श्रुत्युक्तार्थखण्डनं नाम वेदाप्रामाण्यवादित्वं न निर्वहति किम्[१] । तत् विचारवेलायां शांकराद्वैतवादिनोऽपि तथा । तथाप्यर्धजरतीयम् । पूर्वोक्तमनुसृत्य लोकप्रसिद्ध्या वाऽऽस्तिकत्वम् ।

अवशिष्टाः साम्प्रदायिकास्तु सर्वसत्यत्ववादिनो लोकमननुरुन्धाना वेदाक्षरमात्रमपि निरपेक्षप्रमाणं मन्यमाना आस्तिकप्रवरा एव ।

तत्र तावच्छ्रीरामानुजाचार्याः—अप्राकृतहेयप्रत्यनीकसकलकल्याणगुणाकरश्चिदानन्दसत्परब्रह्मादिशब्दवाच्यः परात्परं वस्तु व्यापको भगवान् श्रीपुरुषोत्तमः । स च सविशेष एव । विभागानर्हं चिदचिती तद्विग्रहः । तयोः परिणामश्चेदं विभागार्हं नामरूपि स्थूलं

जगत् । अणुर्न व्यापको जीवस्तथाविधोऽपि भगवतो दासः । परमपुरुषार्थत्वेन भगवति ज्ञाते शास्त्रपर्यवसानम् । भक्त्या च साक्षात्कारः । स्वतःप्रमाणं वेदाः । तदनुकूलानि चान्यानि शास्त्राणि । भगवन्माहात्म्याऽनपहारिण्यश्च युक्तयः ।'दुःखापहारपूर्वकानन्दावाप्तिश्च मोक्षः ।' अभेदवादिन्यः श्रुतयः शरीरशरीरिणोऽस्तंसिन्सान्वयाः । एकाकिनं देवदत्तमानयेत्युक्ते शरीरी देवदत्त आनीयते । तत्राऽभेदस्तयोः । निर्विशेषवादिन्यश्च ताः प्राकृतेतरांस्तस्य धर्मान्वदन्तीति निराकांक्षा इत्याहुः । तदेवं तेषां मतसंक्षेपः ।

ईश्वरश्चिदचिच्चैव पदार्थत्रितयं हरिः ।
ईश्वरश्चित इत्युक्तो जीवो दृश्यमचित्पुनः ॥

द्रव्याद्रव्यप्रभेदान्मितमुभयविधं तद्विदस्तत्त्वमाहु-
र्द्रव्यं द्वेधा विभक्तं जडमजडमिति प्राच्यमव्यक्तकालौ ।
अन्त्यं प्रत्यक् पराक् च प्रथममुभयथा तत्र जीवेशभेदा-
न्नित्या भूतिर्मतिश्चेत्यपरमिह जडामादिमां केचिदाहुः ॥
यदण्डमण्डान्तरगोचरं च यद्दशोत्तराण्यावरणानि यानि च ।
गुणाः प्रधानं पुरुषः परं पदं परात्परं ब्रह्म च ते विभूतयः ॥
इत्याद्याहुः ।

श्रीमध्वाचार्याः श्रीनिम्बार्काचार्याश्च प्रायो जीवेश्वरादिविषये श्रीरामानुजसमानसिद्धान्ताः । केवलं तु भगवच्छरीरविषये विमताः । ते हि समष्टिजीवरूपं त्रिपाद्विभूति ब्रह्मैव भगवद्विग्रह इति

१-तथाविधत्वमत्र कतिपयतद्धर्मवत्वम् । २-अभेदे ।

मन्यन्ते । अभेदाभिधायिन्यः श्रुतयस्तु चित्साजात्यमामनन्तीति स्वीकुर्वन्ति ।

श्रीमद्वल्लभाचार्याश्च—न खलु जीव इव भगवति शरीरशरीरिविभागः संभवति । किन्तु सर्वकारणं स हि क्षराक्षरातीतः सच्चिदानन्दः प्राकृतेतरसकलधर्मवान्मधुरमूर्तिर्भगवाञ्छ्रीकृष्णस्तथाविध एव । यथाधिकारं यथाभावमेक एव विविधतया गृह्यते । तस्मात्साकारत्वनिराकारत्वादयः सर्वेपि धर्मास्तस्मिन्नलौकिक उपपद्यन्ते । सर्वश्रुतीनां प्रामाण्यं च तथैवाऽनपोहितं भवति । इदमत्राकूतम्—प्राधान्येन त्रिविधा जीवाः । तत्र तामसैरसमग्रग्राहिभिर्निर्विशेषं ब्रह्म, तद्भिन्नं मिथ्याप्रत्ययश्च जगदिति गृह्यते । मध्यमैः किंचिद्ग्राहिभिः सधर्मकः परमात्मा, तद्रूपं तद्भिन्नाभिन्नं च जगदिति । उत्तमैस्तु सात्विकैः सकलहेयेतरस्वरूपाभिन्नपूर्णगुणविग्रहः केवलानन्दो भगवान् स एव च प्रपञ्च इति गृह्यते । यदुक्तं समाधिभाषया भगवता श्रीव्यासेन **'ब्रह्मेति परमात्मेति भगवानिति शब्द्यते'** '[1]**इदं हि विश्वं भगवानिवेतरो यस्मिञ्जगत्स्थाननिरोधसंभवाः**' । जीवश्चाराग्रमात्रश्चिद्रूपस्तिरोहितानन्दः । सद्रूपश्च जगत् । अभेदश्च वास्तवः श्रुतिशास्त्रासदादिसाध्यः । भेदस्तु भगवदिच्छाकृतः स्फुटदृश्यो दुर्निवारः । न चैवं भेदाभेद एव प्रतिपन्नो भवति नाऽभेद इति वाच्यम् । भेदस्याऽभेदधर्मत्वात् । घृतस्य द्रवत्ववत् । स्वर्णस्याऽऽकारवत् । धर्मधर्मिणोश्चाऽभेदात् । शुक्तिरजतादौ तु **'अन्यख्यातिरेव'** । तथा हि—भगवान् हि शौक्तिकं रजतं, स्वाग्निकांश्च

१—इदं हि विश्वं, भगवानितरः । इदं हि विश्वं भगवानिव इतरः । इदं हि विश्वं इतरः भगवान् इति पक्षत्रयमत्र ।

पदार्थान् मोहिन्या मायाशक्त्या सृजतीति । इदं च **'अथ रथपथः सृजती'**त्यादि श्रुतिषु **'सृजती'**त्यादिशब्देभ्यो ज्ञातं भवति ।

प्रमाणमूर्धन्यश्च समग्रो भगवान् वेदः । प्रामाण्यं च लोकाऽनधिगतार्थाऽवगाहित्वे सति स्वबुद्धिकार्श्यहेतुककादाचित्काऽयोग्यताज्ञानाऽनपनोद्यभावो नाम । भगवद्गीता, व्याससूत्राणि, समाधिभाषा श्रीमद्भागवतं चेति त्रिकं संदेहवारकत्वेन वेदार्थनिर्णायकमिति प्रमाणम् । तदनुकूलान्यन्यानि शास्त्राण्यपि । अनुमानं तु युक्त्यपरपर्यायो ब्रह्मणि न प्रमाणम् । केवलं तु वादे नास्तिकपराजये कनिष्ठाधिकारिश्रवणे चोपयुज्यत इति लोक एव प्रमाणम् । न च **'यस्तर्केणानुसंधत्ते स धर्मं वेद नेतर'** इति वाक्येन किंचिच्छंक्यम् । तत्र तर्को मीमांसाऽपरपर्यायो नतु प्रसिद्धन्यायरूपदुस्तर्कपरः । तत्परस्य तु श्रुतिस्मृतिषु निन्दैवेत्यलं पक्षाश्रयेण ।

भक्तिश्च साधनम् । तदुत्तरार्द्धे प्रेमासक्त्यादयः फलमित्याहुः । तदयमेतेषां वचनामृतसंक्षेपः ।

'प्रपञ्चो भगवत्कार्यस्तद्रूपो माययाऽभवत्'
'विद्याविद्ये हरेः शक्ती' 'कदाचित्सर्वमात्मैव'
'माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः
स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चाऽन्यथा'

'जीवस्त्वाराग्रमात्रोहि गन्धवद्व्यतिरेकवान्'
'सच्चिदानन्दरूपं तु ब्रह्म व्यापकमव्ययम्
सर्वशक्तिस्वतन्त्रं च सर्वज्ञं गुणवर्जितम्'
'दुःखाभावः सुखं चेति पुरुषार्थद्वयं मतम्'

'धर्मः सम्पद्यते षड्भिरधर्मो ह्यन्यथा भवेत्'
'मिथ्याप्रलोभनं वेदे न क्वचित् कर्हिचिद्भवेत्'
'श्रीकृष्णं पूजयेद्भक्त्या यथालब्धोपचारकैः
यथा सुन्दरतां याति वस्त्रैराभरणैरपि'
'कृष्णे सर्वात्मके नित्यं सर्वथा दीनभावना'
'वेदमार्गविरोधेन येषां करणमण्वपि
ते हि पाखंण्डिनो ज्ञेयाः शास्त्रार्थत्वेन वेषिणः'

तदेवं सिद्धे दर्शनानां नास्तिकत्वाऽऽस्तिकत्वे, फले प्रकारे च वैमत्ये नैकवाक्यता सिध्यति। किन्तु परस्परं भिन्नान्येव दर्शनानि। ये किल दर्शनैक्यप्रतिपादनाग्रहग्रहिलास्तेहि मन्ये गूढं शनैः शनैरनयैव दिशा वर्णाश्रमविभागाद्यैक्यं परेषामिवाऽत्राऽपि संपादयितुमिच्छन्ति। इतिशम्।

एकस्मिन्नेव वेदार्थे वक्तव्ये कथमेतद्भारतीयानां मतवैमत्यमुचितं स्यादिति चेत् श्रूयतां—

कालेन नष्टा(तिरोहिता)प्रलये वाणीयं वेदसंज्ञिता।
मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः॥

तेन प्रोक्ता च पुत्राय मनवे पूर्वजाय सा।
ततो भृग्वादयोऽगृह्णन् सप्त ब्रह्ममहर्षयः॥
तेभ्यः पितृभ्यस्तत्पुत्रा देवदानवगुह्यकाः।
मनुष्याः सिद्धगंधर्वाः सविद्याधरचारणाः॥

१—यः खलु क्वचिन्मतानि व्याजीकृत्य श्रूयते कलहः सतु कालकृतै राजसतामसस्वभावैरेव भवतीति सर्वमनवद्यम्।

किंदेवाः किंनरा नागा रक्षःकिंपुरुषादयः।
बह्व्यस्तेषां प्रकृतयो रजःसत्वतमोभुवः॥
याभिर्भूतानि भिद्यन्ते भूतानां मतयस्तथा।
यथाप्रकृति वैचित्र्याच्चित्रा वाचः स्रवन्ति हि॥

भगवान् श्रीकृष्णः। भा—ए—१४।

तस्मान्न कस्याऽपि दोषः। भगवदिच्छयैव प्रकृतिवैचित्र्यान्नास्तिकत्वमास्तिकत्वं चेति सर्वं मङ्गलम्। ॐश्रीहरिः शम्।

इति साहित्याचार्यशुद्धाद्वैतभूषणमहामहोपदेशकाद्युपाधिमता गोस्वामिकुलकमलसहस्रभानु श्री १०८ श्रीगोकुलनाथमहाराजचरणानुगृहीतेन देवर्षिभट्टश्रीद्वारकानाथशास्त्रिसूनुना भट्टश्रीरमानाथशर्मणा विरचितो **'दर्शनादर्शः'** सम्पूर्णः।

एतन्मुद्रापणव्ययो भा. भवानीदासकाशीदासपत्न्या
मोतीबाईतिनाम्न्या उपायनीकृतः ।

श्रीमद्बालकृष्णपुस्तकालयात्प्रकाशितानां पुस्तकानां सूची ।

सं०	नामानि	मू०	
१	श्रीसुबोधिनी-प्रथमस्कंधः	२)	संस्कृत
२	श्रीबालकृष्णचम्पूः	५)	,,
३	बालबोधः—सटीकः		,,
४	सेवाकौमुदी....		,,
५	भक्तिहंसः—सटीकः	III)	,,
६	निर्णयार्णवः		,,
७	दर्शनादर्शः	=)	,,
८	स्तुतिपारिजातम्		,,
९	व्याख्यानरत्नावलिः		,,
१०	शुद्धाद्वैतदर्शन		भाषा
११	शुद्धाद्वैतसिद्धान्तसार	=)	,,
१२	गीतातात्पर्यम्		भाषान्तरसह
१३	श्रीवल्लभाख्यान		भाषा